॥ श्रीविजयीन्द्रस्तोत्रम् ॥

श्रीमध्वजयराजेन्द्रविभुदेन्द्रार्यवंशजम् ।
सुरेन्द्रकरसञ्जातविजयीन्द्रगुरुम्भजे ॥ १॥

नये शब्दमये पूर्वनये वेदशिरश्चये ।
न्याये च चतुरध्याये धिये काव्यविशुद्धये ॥ २॥

षड्वारं व्यासराजेन्दुमुखाच्छ्रुत्वा विशेषतः ।
मध्वशास्त्रार्थसारं तु व्याचक्षाणं निजान् प्रति ॥ ३॥

नवकृत्वो न्यायसुधां व्यासतीर्थपयोनिधेः ।
उद्धृत्य पीतवन्तं च नाकीन्द्रमिव सन्नुतम् ॥ ४॥

खगेन्द्रस्कन्धमारूढमुपगूढं स्वजायया ।
गाढं नारायणं प्रोउढं भजमानं दृढं सदा ॥ ५॥

श्रीरामं हनुमत्कामं कामकोतिमनोरमम् ।
सव्यासं रक्षसां भीरुं सेवमानं रघूत्तमम् ॥ ६॥

उपास्य नारसिंहम्च सुपापिकृतपीडनम् ।
अपास्य दूरतो धीरमपारमहिमाकरम् ॥ ७॥

जयप्रदं मन्त्रजातं जपन्तं जपतां वरम् ।
जगन्नाथं जगत्यां च निगदन्तं जगद्गुरुम् ॥ ८॥

जितषड्वैरिणं मोदकारिणं दोषहारिणम् ।
कारणं सर्वविद्यानां शरणं चरणं जुषाम् ॥ ९॥

सदयं धीमयं देवं सुखोपायं सुनिर्भयम् ।
पूतकायं गतापायं न जेयं विगतामयम् ॥ १०॥

जित्वा वादे वीरशैवगुरुं विस्तृतसन्मठम् ।
अपहृत्येह संवासं कृतवंतं सतां हितम् ॥ ११॥

दुर्वाद्यपेयरचितग्रन्थारण्यविनष्टये ।
चतुःसङ्ख्याधिकशतग्रन्थाग्नीनां प्रचोदकम् ॥ १२॥

चतुःषष्ठिकलाविद्यापूर्णोऽयमिति बन्दिभिः ।
राजमार्गे घोष्यमाणं श्रीमध्वमतवर्धनम् ॥ १३॥

सुन्दरे कुम्भघोणाख्ये पुरे मन्दरसन्निभे ।
वृन्दावने राजमानं सेवकानां सुरद्रुमम् ॥ १४॥

समुद्रं चोर्ध्वपुण्ड्राङ्कं समुद्रं सुगुणैरलम् ।
सुभद्रं वचसा नित्यं विनिद्रं विकसन्मुखम् ॥ १५॥

वातातपादिजं दुःखं धिङ्कुर्वन्तं धियाऽधिकम् ।
तपन्तं मनसा मुख्यं कुर्वन्तं सुधियां सुखम् ॥ १६॥

यद्वृन्दावनतीर्थपानं पापविमोचनम् ।
नयनं पुण्यराशीनामवनं सम्पदां च तम् ॥ १७॥

सुरधेनोरिवानेकसेवकेष्टसुवर्षिणः ।
प्रपद्ये राघवेन्द्रार्यगुरोरपि परं गुरुम् ॥ १८॥

विजयीन्द्रगुरुस्तोत्रं तद्भक्तेन कृतं हृदा ।
यः पठेत् स भयान्मुक्तः सर्वत्र विजयी भवेत् ॥ १९॥

वचःश्रीतुलसीमाला सेतुमाधवनिर्मिता ।
गुरुणा विजयीन्द्रेण ध्रियतां सघृणे हृदि ॥ २०॥

॥ इति लक्ष्मीनरसिंहसुतसेतुमाधवकृत श्रीविजयीन्द्रस्तोत्रम्॥

॥ भारतीरमणमुख्यप्राणान्तर्गत श्रीकृष्णार्पणमस्तु॥